# आदर्श–प्रश्नपत्रम्

# संस्कृतम्

# कक्षा–नवमी

समयः होरात्रयम् पूर्णांकाः 80

## द्वितीयसत्र–परीक्षा

## खण्ड : 'क'

### अपठित– अवबोधनम् 12

1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –

**(क) प्रथमः अनुच्छेद :**

शंखः लिखितः च द्वौ भ्रातरौ। एकदा लिखितः अग्रजं द्रष्टुं शंखस्य आश्रमम् अगच्छत्। शंखः तत्र न आसीत्। बुभुक्षितः लिखितः आश्रमे आम्राणि त्रोटयित्वा खादितुं प्रारभत। तदैव शंखः तत्र आगच्छति लिखितस्य हस्ते आम्राणि पश्यति। शंखः वदति–भ्रातः। अपृष्ट्वा किमपि वस्तु न स्वीकरणीयम्। अयम् अपराधः। त्वया दण्डः भोक्तव्यः – इति। लिखितः अपि स्वम् अपराधं ज्ञात्वा सहर्षं दण्डं स्वीकृतवान्।

I. लिखितः किं स्वीकृतवान्? 1

(i) दण्डं (ii) अपराधं (iii) आम्रम्

II. पूर्णवाक्येन उत्तरत – 1

लिखितः किमर्थं शंखस्य आश्रमम् अगच्छत् ?

III. भाषिककार्यम् 2

(i) अस्मिन् अनुच्छेदे 'पश्यति' क्रियापदस्य कर्तृपदं किम् ?

(अ) लिखितः (ब) शंखः

(स) बुभुक्षितः (द) तदैव

(ii) 'बुभुक्षितः लिखितः' पदयोः विशेषणपदं किम् ?

**(ख) द्वितीय अनुच्छेदः**

श्रावणमासे पूर्णिमातिथौ संस्कृतदिवसः भवति। सर्वप्रथमं 1969 तमे वर्षे केन्द्रशासनेन एषः निर्णयः कृतः। सर्वे राज्यसर्वकाराः सूचिताः। अतः इदानीं सर्वेषु राज्येषु संस्कृतदिवससमारोहाः आयोजिताः भवन्ति। विद्यालयेषु अपि संस्कृतदिवसः आयोज्यते। तस्मिन् दिने वयम् अपि संस्कृतपद्यानि गायाभः। एकस्य संस्कृतनाटकस्य अपि मञ्चनं कुर्मः। राज्यस्तरे संस्कृतकाव्यालिप्रतियोगिता अपि भवति। अस्माकं विद्यालयः सर्वदा तस्यां प्रथमपुरस्कारं प्राप्नोति। अस्माकं विद्यालये सर्वे छात्राः संस्कृतभाषायाम् एव वार्तालापं कुर्वन्ति। अनेके अतिथयः अस्माकं कार्यक्रमान् द्रष्टुम् आगच्छन्ति। वयम् तैः

सह अपि सस्कृतभाषायां व्यवहारं कुर्मः। सत्यमेव उच्यते – भारतस्य प्रतिष्ठे द्वे संस्कृतम् चैव संस्कृतिः।

**प्रश्नाः**

**I.** **एकपदेन उत्तरत** 2

(i) विद्यालये वयम् कस्यां भाषायां वार्तालापं कुर्मः ?

(ii) काव्यालिप्रतियोगिता कस्मिन् स्तरे आयोज्यते ?

**II.** **पूर्णवाक्येन उत्तरत** 2

संस्कृतदिवसः कदा भवति?

**III.** **'कुर्वन्ति' इति क्रियापदस्य किं कर्तृपदम् ?** 1

(अ) अस्माकम् (ब) सर्वे

(स) छात्राः (द) वार्तालापम्

**IV.** **'अस्माकं विद्यालयः सर्वदा तस्यां प्रथमपुरस्कारं प्राप्नोति' इत्यत्र 'तस्याम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?** 1

(अ) प्रतियोगितायै (ब) संस्थायै

(स) नाटकाय (द) पद्यगायनाय

**V.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** 2

## खण्डः ख 12

# रचनात्मकं लेखनम्

**2. पत्रलेखनम्** 4

भवान् विनयः। भवतः निवासः छात्रावासे अस्ति। दिल्ली नगरे संस्कृतसंभाषणशिविरे प्रतिभागित्वं कर्तुम् इच्छति। प्रधानाचार्यं प्रति लिखिते पत्रे शब्दसूचीसहातया रिक्तस्थानपूर्तिं कुरुत।

सेवायाम्
श्रीमान् प्रधानाचार्य (i) ........................
लक्ष्मीनारायण संस्कृतविद्यालयः
वाराणसी, उत्तरप्रदेशः।

महोदय,

सेवायां निवेदनम् अस्ति यत् विद्यालयस्य (ii).............................. एकं विज्ञापनम् अस्ति। तत्र लिखितम् यत् दिल्लीनगरे दिसम्बरमासे एकं विशेषं संस्कृतसंभाषणशिविरम् (iii)..................। अहम् अपि (iv).............................. प्रतिभागित्वं कर्त्तुम इच्छामि।

कृपया भवन्तः तदर्थं स्वीकृतिं (v).......................... अनुगृहीतं कुर्वन्तु। विद्यालयेतु (vi) .................... दिवसेषु अवकाशः एव।

सधन्यवादम्

वाराणसी (vii) ............ आज्ञाकारी शिष्यः

तिथिः 25 नवम्बर, 2009 (viii)............................................

कक्षा नवमी 'अ'
छात्रावासे रामखण्डे
कक्षसंख्या 15

| **शब्दसूची** |
|---|
| सूचनापट्टे, तस्मिन्, तेषु, प्रदाय, भवदीयः, महोदय, भविष्यति, विनयः |

**3. अनुच्छेलेखनम्** 8

मंजूषायां प्रदत्तशब्दानां सहायतया 'स्वच्छता' विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत

| ***मंजूषा*** |
| --- |
| स्वच्छतायाः, अवकरपात्रेषु, जनाः, मार्गे, इतस्ततः, आवश्यकता, महती, वर्तते, उद्यानेषु, मार्गेषु, कोऽपि, एकः, सर्वेषां, कर्तुम् न शक्नोतिं, कर्तव्यम्, क्षेपणीयम्, क्षिपन्ति, फलानाम्, आवरणानि, कर्गदपत्राणि |

***अथवा***

अधोलिखितं चित्रं दृष्ट्वा मंजूषायाम् प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि लिखत।



***मंजूषा***

| |
| --- |
| कारयानम्, मयूरः, रक्तवर्णम्, सज्जनः, छायाचित्रं, वृक्षाणां, छायायाम्, कारयानस्य उपरि, एका महिला, प्रसन्ना, बृहदाकारः, पश्यति, आश्चर्यचकितः, तिष्ठति, उद्यानस्य समीपे। |

## खण्डः 'ग'

### अनुप्रयुक्तव्याकरणम 28

4. (i) **रेखांकितपदे आत्मन् शब्दस्य का विभक्तिः**

<u>आत्मनः</u> प्रतिकूलानि परेषां न समाचरेत्। 1

(अ) सप्तमी (ब) प्रथमा

(स) तृतीया (द) द्वितीया

(ii) **अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ?** 1

.................... किम् अहम् बहिः गच्छानि ? (श्रीमत्)

(अ) श्रीमान् (ब) श्रीमत्

(स) श्रीमन्

(iii) **प्रकोष्ठे प्रदत्तशब्दस्य समुचितरूपेण रिक्तस्थानानि पूरयत –** 2

(अ) सर्वे ...................... स्तब्धाः जाताः (विद्वांन्, विद्वांसौ, विद्वांसः)

(आ) वदन्तु ....................... किं आत्मा अपि वक्रः भवति।

(भवान्, भवन्तौ, भवन्तः)

5. (i) **रेखांकितपदे का विभक्तिः किं च वचनम् ?** 1

रामः उद्याने तिस्रः बालिकाः पश्यति।

(अ) प्रथमा, एकवचनम् (ब) प्रथमा, बहुवचनम्

(स) द्वितीया, बहुवचनम् (द) द्वितीया, एकवचनम्

(ii) **अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ?** 1

............. मित्रे वार्तालापं कुरुतः। (द्वि)

(अ) द्वौ (ब) द्वे

(स) द्वयोः (द) द्वाभ्याम्

(iii) **कोष्ठके प्रदत्तशब्दे उचितविभक्तिं प्रयुज्य वाक्यपूर्तिः क्रियताम्** 2

(अ) शरीरे ......................... इन्द्रियाणि भवन्ति। (पञ्च)

(आ) संस्कृतभाषायाम्.................. वचनानि भवन्ति। (त्रि)

6. **अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां लोट्लकारे क्रियापदानां किं समुचितं क्रमं भविष्यति ?** 3

(i) ............... भवान्। (गच्छतु, गच्छ, गच्छानि)

(ii) यूयं तत्र ...............। (पृच्छन्तु, पृच्छत, पृच्छाम)

(iii) आवाम् ..................। (पठताम्, पठाव, पठतम्)

7. **अधोलिखितवाक्येषु विधिलिङ्ग क्रियापदानि योजयत** **3**

**(i) भवान् शीघ्रं नीरोगः ................... । (भू)**

(अ) भवतु (ब) भव

(स) भवेत् (द) भवत्

**(ii) वयम् सर्वेषां चिकित्सां ........................... । (कृ)**

(अ) कुर्यात् (ब) कुर्युः

(स) कुर्याव (द) कुर्याम

**(iii) छात्राः वाटिकायां पुष्पाणि न ..................... । (त्रुट्)**

8. **अधोलिखितवाक्येषु रिक्तस्थानानि समुचितपदैः पूरयत –** 3

**(i) नभः ................. विना न शोभते।**

(अ) चन्द्रस्य (ब) चन्द्रस्य

(स) चन्द्रम् (द) चन्द्रे

**(ii) ................. आरभ्य श्रावणपर्यन्तं वर्षा ऋतुः। (आषाढ)**

(अ) आषाढम् (ब) आषाढेन

(स) आषाढस्य (द) आषाढात्

**(iii) गुरुजनः .................... स्निह्यन्ति। (छात्र)**

9. **अधोलिखिते अनुच्छेदे मंजूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयत** 5

प्रायः जनाः (i) ................. भयं कुर्वन्ति। (ii)........................... न स्निह्यन्ति। एकः वंशीवादकः (iii).................. प्रति आगच्छति। सः वदति – धिक् (iv).....................। (v).............. विश्वासं कुरुत। अहं वंशीं वादयिष्यामि सर्वान् इतः नेष्यामि।

[ग्रामम्, मयि, मूषकेभ्यः मूषकान् तेषु ]

**10.** **धातु+क्त/क्तवतु प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत–** **3**

**(क)** **इदं कार्यं मया..................।**

(i) कृतः (ii) कृतम् (iii) कृत्वा (iv) कर्त्तुम्

**(ख)** **ते तत्र ............................**

(i) गतवान् (ii) गच्छन् (iii) गतवन्तः (iv) गतवत्

**(ग)** **.................. बालिका कुत्र अगच्छत्?**

(i) मोदमाना (ii) मोदन्ती (iii) मोदमानां (iv) मोदन्तीम्

**निर्दिष्ट–धातु–प्रत्यययोगेन रूपेण वाक्यपूर्तिं कुरुत –** 1 x 3 = 3

(i) विद्यालयं.......... (गम्+शतृ) बालकः प्रसन्नः अस्ति।

(ii) ............. (हस्+शतृ) बालिका अत्र आगच्छति।

(iii) सः हयः स्वगृहं............ (गम्+क्तवतु)

## खण्डः 'घ'

28

11. **अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्ननानाम् उत्तराणि संस्कृतेन लिखत**

**गद्यांशः**

नालन्दाविश्वविद्यालये बौद्धदर्शनेन सह कृषिः आयुर्वेदः, पशुविज्ञानं, कला शिल्पानि च अध्यापितानि आसन्। सप्तवर्षीयः सन् छात्रः पशुविद्याः अधीतवान्। प्रथमा शब्दविद्या तु व्याकरणस्य ज्ञानाय अभवत्। तदनु द्वितीया विद्या शिल्पस्थानम् हति विख्याता। एतेन शिल्पानि, यन्त्रनिर्माणविधिः, ज्योतिषं, तिथिपत्रं च शिक्षितानि। आयुर्वेदः तृतीया विद्या। चतुर्थी तर्कशास्त्रम् पंचमी च आध्यात्मिकी यया जीवनस्य रहस्यानि उद्घाटितानि।

प्रश्नाः

**I.** **सप्तर्षीयः बालकः कति विद्याः अधीतवान् ?** 1

(अ) चतस्रः (ब) तिस्स्रः

(स) सप्त (द) पञ्च

**II.** **पूर्णवाक्येन उत्तरत** 1

शिल्पान्तगर्तम् किम् किम् शिक्ष्यते स्म ?

III. (i) 'पाठितानि' इति स्थाने किं पदम्अत्र प्रयुक्तम् 2

(ii) 'यया जीवनस्य रहस्यानि ............. इति वाक्यांशे 'यया' पदं कस्यै प्रयुक्तम्?

(क) तर्कशास्त्राय (ख) आयुर्वेदाय (ग) आध्यात्मिकी इति विद्यायै।

**पद्यांश**

मूलं भुजङ्गैः, शिखरं प्लवङ्गैः, शाखा विहङ्गैः कुसुमानि भृंगैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्।।

**प्रश्नाः**

**I.** **चन्दनपादपस्य सर्वमेव कैः आश्रितम् ?** 1

(अ) विहंगैः (ब) भृङ्गैः

(स) भुजंगैः (द) सत्त्वभरैः

**II.** **पूर्णवाक्येन उत्तरत**

चन्दनपादपस्य शिखरं कैः आश्रितम् ? 1

III. (i) पक्षिभिः इति स्थाने किं पदम् अत्र प्रयुक्तम् ? 2

(ii) 'अस्ति' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**नाट्यांशः**

**नगरपालः** (प्रविश्य) महाराज! आनीतोऽयं कुविन्दः। अयं काव्यं कर्तं न जानाति।

**भोजः** (कुविन्दं प्रति) भोः! त्वं काव्यं कर्तुं न जानीषे। अतः राजकोषात् धनं गृहीत्वा क्वचिदन्यत्र प्रस्थानं कुरु। तव गृहे एष पण्डितवरः सकुटुम्बः स्थास्यति।

**तन्तुवायः** राजन्! राजनियमः तु मया पालनीयः एव तथापि श्रूयतां मम एकं निवेदनम्

**भोजः** त्वरितं ब्रूहि।

**तन्तुवायः** महाराज! तन्तुवयनं मम व्यवसायः। अहं रात्रिन्दिवं परिक्रम्य अनेन व्यवसायेन जीविकामर्जयामि।

**प्रश्नाः**

I. कुविन्दस्य व्यवसायः किम् ? 1

(अ) राजनियमपालनम् (ब) जीविकार्जनम्

(स) तन्तुवयनम् (द) काव्यलेखनम्

II. (i) 'कुविन्द' इति पदस्य किमन्यत् समानार्थकं पदं अत्र प्रयुक्तम् ? 2

(ii) 'सकुटुम्ब' इति पदस्य विशेष्यं किम् पदम् ? 1

**12. अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत** 4

(i) यदा मुनिः क्रोधेन तां पश्यति, सा दग्धा अधः पतति।

(ii) पतिसेवारता गृहिणी विलम्बम् अकरोत्।

(iii) विहस्य गृहिणी वदति – नाहं बलाका।

(iv) एकः मुनिः वृक्षच्छायायाम् उपविष्टः।

(v) तच्छ्रुत्वा मुनेः अहङ्कारः नश्यति।

(vi) वृक्षे स्थिता बलाका तस्य उपरि विष्टाम् उदसृजत्।

(vii) मुनिः एकं गृहं गत्वा भिक्षाम् अयाचत।

(viii) मुनिः गृहिणीमपि सक्रोधं पश्यति।

**13. अधोलिखितपद्यांशद्वयस्य अन्वययोः रिक्तस्थानपूर्तिं कुरुत।** 4

(i) नृत्यामि नित्यं धवलास्तरेषु, संकेतिताङ्कैः प्रकटीकरोमि।
भावं जनानो ह्रदयेषु गूढं, कृष्णाननाऽऽलोच्यं वदन्तु काऽहम् ?

**अन्वयः**

(अहम्) कृष्णानाना (i)................. धवलास्तेरषु (ii)........................, जनानाम् ह्रदयेषु (iii).................... भावं सङ्केतिताङ्कैः प्रकटीकरोमि। (iv)................ वदेन्तु अहम् का?

(ii) शोषितो नात्र कश्चित् भवेत् केनचित् व्याधिना पीडितो नो भवेत्कश्चन।
नात्र कोऽपि व्रजेत् दीनतां हीनतां, मोदतां राजतां पावनं भारतम्।।

**अन्वयः**

अत्र कश्चित् कंनचित् (i)................ न भवेत, कश्चन व्याधिना पीडितः (ii)................. न भवेत, अत्र कः अपि दीनताम् (iii).................... न व्रजेत्, पावनम् भारतम् (iv)....... .......... राजताम्।।

**14. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत** 4

**(i) एषा कथा भरतमुनेः नाट्यशास्त्रे वर्णिता।**

(अ) केषाम् (ब) कस्मात्
(स) कस्मिन् (द) कस्य

**(ii) एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत्।**

(अ) कया (ब) केन
(स) कस्याः (द) कस्मात्

(iii) **प्रतिध्वनिविज्ञानं विना संगीतसाधनानां निर्माणम् असाध्यम्।**

(अ) केन (ब) कम्
(स) किम् (द) काम्

**(iv) सैन्यविज्ञानेऽपि गभीराध्ययनं कृत्वा सिद्धयः प्राप्ताः।**

(अ) कस्मिन्नपि (ब) केनापि
(स) कुत्रापि (द) केषु अपि

**15. अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत –** 4

**(i) वराकोऽयं सामग्र्याः अभावेन खिद्यते ।**

(अ) वृकः (ब) श्रेष्ठः
(स) दीनः (द) वरणीयः

**(ii) भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नो समाधेयः**

(अ) विधेयः (ब) ध्यातव्यः
(स) चेतव्यः (द) ज्ञातव्यः

**(iii) भवतः चिन्तातुरतां परिज्ञाय भग्नमिव मे हृदयम्।**

(अ) सम्यक् निश्चित्य (ब) सम्यक् ज्ञात्वा
(स) निर्दिश्य (द) प्रतिज्ञां कृत्वा

**(iv) आत्मघातिनाः जनाः तु असूर्यान् लोकान् व्रजन्ति।**

(अ) भजन्ति (ब) व्रजं गच्छन्ति
(स) गच्छन्ति (द) पश्यन्ति।